## नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः । (१६८/३९०२)

अव्यय दिक्शब्द गो महत् स्थूल मुष्टि पृथु वत्स इत्येतेभ्यः परं [1]मुखं स्वाङ्गवाचि बहुव्रीहौ समासे नान्तोदात्तं भवति । अव्यय – उच्चैर्मुखः । नीचैर्मुखः । दिक्शब्द – प्राङ्मुखः । प्रत्यङ्मुखः[2] । गो – गोमुखः । महत् – महामुखः । स्थूल – [3]स्थूलमुखः । मुष्टि – मुष्टिमुखः । पृथु – [4]पृथुमुखः । वत्स – वत्समुखः । पूर्वपदप्रकृतिस्वरो यथायोगमेषु भवति । गोमुष्टिवत्सपूर्वस्यो[5]पमान[6]लक्षणो विकल्पः पूर्वविप्रतिषेधेन बाध्यते ॥

## निष्ठोपमानादन्यतरस्याम् । (१६९/३९०३)

निष्ठान्तात् उपमानवाचिनश्च [7]मुखं स्वाङ्गम् उत्तरपदमन्यतरस्यां बहुव्रीहौ समासेऽन्तोदात्तं भवति । प्रक्षालितमुखः, प्रक्षालितमुखः, प्रक्षालितमुखः । यदैतदुत्तरपदान्तोदात्तत्वं न भवति तदा 'निष्ठोपसर्गपूर्वमन्यतरस्याम्' (६. २. ११०/३८४४) इति पक्षे पूर्वपदान्तोदात्तत्वं, तदभावपक्षेऽपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरः इति त्रीण्युदाहरणानि भवन्ति । उपमानात् – सिंहमुखः, सिंहमुखः । व्याघ्रमुखः, व्याघ्रमुखः ॥

## जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः । (१७०/३९०४)

जातिवाचिनः आच्छादनवर्जितात् कालवाचिनः सुखादिभ्यश्च परं क्तान्तं कृतमितप्रतिपन्नान् वर्जयित्वा बहुव्रीहौ समासेऽन्तोदात्तं भवति । सारङ्गजग्धः । पलाण्डुभक्षितः । सुरापीतः । [9]काल – मासजातः । संवत्सरजातः । द्व्यहजातः । त्र्यहजातः । सुखादिभ्यः – सुखजातः । दुःखजातः । तृप्रजातः । जात्यादिभ्यः इति किम् ? पुत्रजातः । आहिताग्न्यादित्वात् परनिपातः । अनाच्छादनात् इति किम् ? वस्त्रच्छन्नः । वसनच्छन्नः । अकृतमितप्रतिपन्नाः इति किम् ? कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः । एतेषु बहुव्रीहिषु निष्ठान्तस्य पूर्वनिपातो न भवत्येवास्मादेव ज्ञापकात् । प्रत्युदाहरणेषु पूर्वपदप्रकृतिस्वरो योजयितव्यः । सुखादयस्तृतीयेऽध्याये (३. १. १८/२६७४) पठ्यन्ते ॥

## वा जाते । (१७१/३९०५)

जातशब्दे उत्तरपदे वा अन्त उदात्तो भवति बहुव्रीहौ समासे जातिकालसुखादिभ्यः । [10]दन्तजातः, दन्तजातः । स्तनजातः, स्तनजातः । कालात् – मासजातः, मासजातः । संवत्सरजातः, संवत्सरजातः । सुखादिभ्यः – सुखजातः, सुखजातः । दुःखजातः, दुःखजातः ॥

---

1. मुखशब्दः फ. 2. उदङ्मुखः इत्यधिकम् फ. 3. स्थूलमुखः नास्ति फ. 4. पृथुमुखः नास्ति फ
5. उपमानः फ. 6. लक्षणे क, लक्षणेऽपि ह. 7. परं इत्यधिकम् फ. 8. शाङ्गर न्या. 9. कालात् क.
10. दन्तजातः नास्ति फ.